॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ८६

महोदरे तु निहते महापार्श्वो महाबलः ।
अङ्गदस्य चमूं भीमां क्षोभयामास सायकैः ॥ १॥

स वानराणां मुख्यानामुत्तमाङ्गानि सर्वशः ।
पातयामास कायेभ्यः फलं वृन्तादिवानिलः ॥ २॥

केषां चिदिषुभिर्बाहून्स्कन्धांश्चिच्छेद राक्षसः ।
वानराणां सुसङ्क्रुद्धः पार्श्वं केषां व्यदारयत् ॥ ३॥

तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः ।
विषादविमुखाः सर्वे बभूवुर्गतचेतसः ॥ ४॥

निरीक्ष्य बलमुद्विग्नमङ्गदो राक्षसार्दितम् ।
वेगं चक्रे महाबाहुः समुद्र इव पर्वणि ॥ ५॥

आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम् ।
समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत् ॥ ६॥

स तु तेन प्रहारेण महापार्श्वो विचेतनः ।
ससूतः स्यन्दनात्तस्माद्विसंज्ञः प्रापतद्भुवि ॥ ७॥

सर्क्षराजस्तु तेजस्वी नीलाञ्जनचयोपमः ।
निष्पत्य सुमहावीर्यः स्वाद्यूथान्मेघसंनिभात् ॥ ८॥

प्रगृह्य गिरिशृङ्गाभां क्रुद्धः स विपुलां शिलाम् ।
अश्वाञ्जघान तरसा स्यन्दनं च बभञ्ज तम् ॥ ९॥

मुहूर्तात्प्रबुधसंज्ञस्तु महापार्श्वो महाबलः ।
अङ्गदं बहुभिर्बाणैर्भृयस्तं प्रत्यविध्यत ॥ १०॥

जाम्बवन्तं त्रिभिर्बाणैराजघान स्तनान्तरे ।
ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः ॥ ११॥

गवाक्षं जाम्बवन्तं च स दृष्ट्वा शरपीडितौ ।
जग्राह परिघं घोरमङ्गदः क्रोधमूर्छितः ॥ १२॥

तस्याङ्गदः प्रकुपितो राक्षसस्य तमायसं ।
दूरस्थितस्य परिघं रविरश्मिसमप्रभम् ॥ १३॥

द्वाभ्यां भुजाभ्यां सङ्गृह्य भ्रामयित्वा च वेगवान् ।
महापार्श्वाय चिक्षेप वधार्थं वालिनः सुतः ॥ १४॥

स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः ।
धनुश्च सशरं हस्ताच्छिरस्त्रं चाप्यपातयत् ॥ १५॥

तं समासाद्य वेगेन वालिपुत्रः प्रतापवान् ।
तलेनाभ्यहनत्क्रुद्धः कर्णमूले सकुण्डले ॥ १६॥

स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः ।
करेणैकेन जग्राह सुमहान्तं परश्वधम् ॥ १७॥

तं तैलधौतं विमलं शैलसारमयं दृढम् ।
राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत् ॥ १८॥

तेन वामांसफलके भृशं प्रत्यवपातितम् ।
अङ्गदो मोक्षयामास सरोषः स परश्वधम् ॥ १९॥

स वीरो वज्रसङ्काशमङ्गदो मुष्टिमात्मनः ।
संवर्तयन्सुसङ्क्रुद्धः पितुस्तुल्यपराक्रमः ॥ २०॥

राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयं प्रति ।
इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत् ॥ २१॥

तेन तस्य निपातेन राक्षसस्य महामृधे ।
पफाल हृदयं चाशु स पपात हतो भुवि ॥ २२॥

तस्मिन्निपतिते भूमौ तत्सैन्यं सम्प्रचुक्षुभे ।
अभवच्च महान्क्रोधः समरे रावणस्य तु ॥ २३॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com